निर्ममो योजकः

**1) ससन्दर्भम् लिखत - योग्योऽहम् त्वमयोग्यमिति किमनन । कः कं प्रति वदति ?**

श्रीमता विशाखदत्तेन विरचितं रूपकं भवति मुद्राराक्षसम्।अस्य नाटकस्य अन्तिमभागः पाठभागत्वेन स्वीकृतः।चाणक्यः स्व तन्त्रैः शत्रुपक्षे स्थितं अमात्यराक्षसम् चन्द्रगुप्तस्य मन्त्रिपदे नियुक्तवान् ।चन्दगुप्त राक्षसयोः समागमः सन्दर्भः। तदवसरे योजकस्य चाणक्यस्य वचनमिदम्। चाणक्यस्य स्थाने स्थातुं अहं न समर्थः इति राक्षसः वदति ।

**2)को हेतुः – इतः किञ्चितकालमत्र एकान्ततायां तूष्णीं उपविशामि दृष्टानां हेतुं परिचिन्तयामि ।**

कोहेतु इति पाठभागे विद्यमानः अयं वाक्यः। श्री बुद्धदेवस्य महाप्रस्थानं अधिकृत्य माडम्प् कुञ्चिक्कुट्टन् महोदयेन रचितं कैरलीग्रन्थं भवति महाप्रस्थानम्। श्री अशोकन् पुरनाट्टुकरा महोदयेन संस्कृतानुवादः कृतः ।बुद्धस्य महाप्रस्थानानन्तरं यशोदरा देव्याः स्मरणाः अत्र वर्णिताः। एतदेव अस्य वाक्यस्य सन्दर्भः। लोके विद्यमानानि दुःखानि दृष्ट्वा श्रीबुद्धः तानि अधिकृत्य चिन्तयति ।

**3)नारायणगुरुदेवः – स्वामिनः भुतदयालुतां ..........।**

दीनदयालुर्भव इति पाठात् स्वीकृतः अयं वाक्यः। श्रीनारायण गुरुदेवस्य जीवनचरितं अस्मिन् वर्ण्यते। अरुविप्पुरमठे समीपे एकं कदलीवनं वर्तते । एकः क्षुधार्तः कदलीफलगुच्छं मुषित्वा अगच्छत्। सर्वे तं चोरः इत्युक्त्वा न्यायाधीशसकाशं नीतः।तस्य शताधिकं दण्डं च लब्धम्।तत् श्रुत्वा गुरुदेवः खिन्नमानसोऽभवत्।कुमारनाशान् एतत् वृत्तान्तं न्यायाधीशाय न्यवेदयत्। स्वामिनः भूतदयालुतां अवधार्य सः न्यायाधीशः तं चोरकल्पं स्वेच्छया गन्तुं अनुजज्ञे ।

**4)शारिके जानामि सर्वं वृत्तान्तं ।सम्यगाचरितं भवत्या ।**

व्रजहरितं इति पाठात् स्वीकृतः अयं कथासन्दर्भः ।महाभारतात् स्वीकृतोऽयं कथा। अहमेव प्रकृतिः इति उदात्तभावं तथा सहजीवि स्नेहं च अत्र वर्णितं । प्रकृति मनुष्याणां एकभावना आर्द्रचित्ततया साध्या ।शारिकायाः

स्नेहं आर्द्रतां च दृष्ट्वा सन्तुष्टा तापसी एवं तां वदति।आर्द्रतायाः नाशे प्रकृतिनाशः सर्वनाशः च भविष्यति।

5)**आस्वादनटीका** –(आमुखम्,पदानां औचित्यम्,अलंकारप्रयोगः,तालबद्धता, पदविन्यासः,विषयस्य कालिक प्रसक्तिः)

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः।

अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः।।

चिन्तारतो बालकः नाम पाठात् स्वीकृतः अयं श्लोकः।केरलीय संस्कृत कवि परम्परायां अन्यतमः भवति पि.सि.देवस्या। अनेन विरचितं काव्यं भवति क्रिस्तुभागवतम्। अस्मिन् काव्ये येशुदेवस्य जन्मनः प्रभृति क्रूशितमरण पर्यन्तं जीवितवृत्तान्तं वर्णितम्।येशुदेवस्य जीवनं अधिकृत्य प्रथमतया रचितं इदं काव्यम्।अयं बालःयेशु शक्तियुक्तः विद्यासम्पन्नः च सन् मातापित्रोः अद्भुतेन आनन्देन शान्त्या च समम् अवर्धत। बाल्यकस्य येशुदेवस्य व्यक्तित्वं विशिष्टं आसीदिति अनेन ज्ञातुं शक्यते ।स्नेह एव ईश्वरः इति तत्वं स्वजीवनेन आविष्कृतवान् आसीत् येशुदेवः।

अस्मिन् श्लोके महत्वपूर्णं आशयं अतीवसरलया रीत्या कविः वर्ण्यते ।आशयानुसारं उचितानि पदानि तेन स्वीक-तानि।प्रसादं माधुर्यं आदि काव्यगुणाः अस्मिन् विद्यते।अनुष्टुप् वृत्ते रचितमिदं आलापनयोग्यं च। क्रिस्तु देवस्य सन्देशं स्वजीविते जनाः आचरिष्यति चेत् समाजे विद्यमानानाः वहवः समस्याः विनष्टा भवेत्। एतैः कारणैः इदं मम इष्टतमं श्लोकम्।